# adhyAtmarAmAyaNe sundarakANDam

# અધ્યાત્મરામાયણે સુન્દરકાણ્ડમ્

## Document Information

Text title : adhyAtma rAmAyaNa sundara kANDa

File name : adhyaatmaRamsundara.itx

Category : adhyAtmarAmAyaNa, raama, vyAsa

Location : doc_raama

Author : Shri Veda Vyas

Transliterated by : Vishwas Bhide vishwas underscore bhide at yahoo.com

Proofread by : Vishwas Bhide, PSA EASWARAN

Latest update : July 22, 2006, April 15, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

adhyAtmarAmAyaNe sundarakANDam

# અધ્યાત્મરામાયણે સુન્દરકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
શતયોજનવિસ્તીર્ણં સમુદ્રં મકરાલયમ્ ।
લિલઙ્ઘયિષુરાનન્દસન્દોહો મારુતાત્મજઃ ॥ ૧॥

ધ્યાત્વા રામં પરાત્માનમિદં વચનમબ્રવીત્ ।
પશ્યન્તુ વાનરાઃ સર્વે ગચ્છન્તં માં વિહાયસા ॥ ૨॥

અમોઘં રામનિર્મુક્તં મહાબાણમિવાખિલાઃ ।
પશ્યામ્યદ્યૈવ રામસ્ય પત્નીં જનકનન્દિનીમ્ ॥ ૩॥

કૃતાર્થોઽહં કૃતાર્થોઽહં પુનઃ પશ્યામિ રાઘવમ્ ।
પ્રાણપ્રયાણસમયે યસ્ય નામ સકૃત્સ્મરન્ ॥ ૪॥

નરસ્તીર્ત્વા ભવામ્ભોધિમપારં યાતિ તત્પદમ્ ।
કિં પુનસ્તસ્ય દૂતોઽહં તદઙ્ગાઙ્ગુલિમુદ્રિકઃ ॥ ૫॥

તમેવ હૃદયે ધ્યાત્વા લઙ્ઘયામ્યલ્પવારિધિમ્ ।
ઇત્યુક્ત્વા હનુમાન્ બાહૂ પ્રસાર્યાયતવાલધિઃ ॥ ૬॥

ઋજુગ્રીવોર્ધ્વદૃષ્ટિઃ સન્નાકુઞ્ચિતપદદ્વયઃ ।
દક્ષિણાભિમુખસ્તૂર્ણં પુપ્લુવેઽનિલવિક્રમઃ ॥ ૭॥

આકશાત્ત્વરિતં દેવૈર્વીક્ષ્યમાણો જગામ સઃ ।
દૃષ્ટ્વાનિલસુતં દેવા ગચ્છન્તં વાયુવેગતઃ ॥ ૮॥

પરીક્ષણાર્થં સત્ત્વસ્ય વાનરસ્યેદમબ્રુવન્ ।
ગચ્છત્યેષ મહાસત્ત્વો વાનરો વાયુવિક્રમઃ ॥ ૯॥

લઙ્કાં પ્રવેષ્ટું શક્તો વા ન વા જાનીમહે બલમ્ ।
એવં વિચાર્ય નાગાનાં માતરં સુરસાભિધામ્ ॥ ૧૦॥

અબ્રવીદ્દેવતાવૃન્દઃ કૌતૂહલસમન્વિતઃ ।
ગચ્છ ત્વં વાનરેન્દ્રસ્ય કિઞ્ચિદ્વિઘ્નં સમાચર ॥ ૧૧॥

જ્ઞાત્વા તસ્ય બલં બુદ્ધિં પુનરેહિ ત્વરાન્વિતા ।
ઇત્યુક્તા સા યયૌ શિઘ્રં હનુમદ્વિઘ્નકારણાત્ ॥ ૧૨॥

આવૃત્ય માર્ગં પુરતઃ સ્થિત્વા વાનરમબ્રવીત્ ।
એહિ મે વદનં શીઘ્રં પ્રવિશસ્વ મહામતે ॥ ૧૩॥

દેવૈસ્ત્વં કલ્પિતો ભક્ષ્યઃ ક્ષુધાસમ્પીડિતાત્મનઃ ।
તામાહ હનુમાન્ માતરહં રામસ્ય શાસનાત્ ॥ ૧૪॥

ગચ્છામિ જાનકીં દ્રષ્ટું પુનરાગમ્ય સત્વરઃ ।
રામાય કુશલં તસ્યાઃ કથયિત્વા ત્વદાનનમ્ ॥ ૧૫॥

નિવેક્ષ્યે દેહિ મે માર્ગં સુરસાયૈ નમોઽસ્તુ તે ।
ઇત્યુક્તા પુનરેવાહ સુરસા ક્ષુધિતાસ્મ્યહમ્ ॥ ૧૬॥

પ્રવિશ્ય ગચ્છ મે વક્ત્રં નો ચેત્ત્વાં ભક્ષયામ્યહમ્ ।
ઇત્યુક્તો હનુમાનાહ મુખં શીઘ્રં વિદારય ॥ ૧૭॥

પ્રવિશ્ય વદનં તેઽદ્ય ગચ્છામિ ત્વરયાન્વિતઃ ।
ઇત્યુક્ત્વા  યોજનાયામદેહો ભૂત્વા પુરઃ સ્થિતઃ ॥ ૧૮॥

દૃષ્ટ્વા હનૂમતો રૂપં સુરસા પઞ્ચયોજનમ્ ।
મુખં ચકાર હનુમાન્ દ્વિગુણં રૂપમાદધત્ ॥ ૧૯॥

તતશ્ચકાર સુરસા યોજનાનાં ચ વિંશતિમ્ ।
વક્ત્રં ચકાર હનુમાંસ્ત્રિંશદ્યોજનસમ્મિતમ્ ॥ ૨૦॥

તતશ્ચકાર સુરસા પઞ્ચાશદ્યોજનાયતમ્ ।
વક્ત્રં તદા હનૂમાંસ્તુ બભૂવાઙ્ગુષ્ઠસન્નિભઃ ॥ ૨૧॥

પ્રવિશ્ય વદનં તસ્યાઃ પુનરેત્ય પુરઃ સ્થિતઃ ।
પ્રવિષ્ટો નિર્ગતોઽહં તે વદનં દેવિ તે નમઃ ॥ ૨૨॥

એવં વદન્તં દૃષ્ટ્વા સા હનૂમન્તમથાબ્રવીત્ ।
ગચ્છ સાધય રામસ્ય કાર્યં બુદ્ધિમતાં વર ॥ ૨૩॥

દેવૈઃ સમ્પ્રેષિતાહં તે બલં જિજ્ઞાસુભિઃ કપે ।
દૃષ્ટ્વા સીતાં પુનર્ગત્વા રામં દ્રક્ષ્યસિ ગચ્છ ભોઃ ॥ ૨૪॥

ઇત્યુક્ત્વા સા યયૌ દેવલોકં વાયુસુતઃ પુનઃ ।
જગામ વાયુમાર્ગેણ ગરુત્માનિવ પક્ષિરાટ્ ॥ ૨૫॥

સમુદ્રોઽપ્યાહ મૈનાકં મણિકાઞ્ચનપર્વતમ્ ।
ગચ્છત્યેષ મહાસત્ત્વો હનૂમાન્મારુતાત્મજઃ ॥ ૨૬॥

રામસ્ય કાર્યસિદ્ધ્યર્થં તસ્ય ત્વં સચિવો ભવ ।
સગરૈર્વર્દ્ધિતો યસ્માત્પુરાહં સાગરોઽભવમ્ ॥ ૨૭॥

તસ્યાન્વયે બભૂવાસૌ રામો દાશરથિઃ પ્રભુઃ ।
તસ્ય કાર્યાર્થસિદ્ધ્યર્થં ગચ્છત્યેષ મહાકપિઃ ॥ ૨૮॥

ત્વમુત્તિષ્ઠ જલાત્તૂર્ણં ત્વયિ વિશ્રમ્ય ગચ્છતુ ।
સ તથેતિ પ્રાદુરભૂજ્જલમધ્યાન્મહોન્નતઃ ॥ ૨૯॥

નાનામણિમયૈઃ શૃઙ્ગૈસ્તસ્યોપરિ નરાકૃતિઃ ।
પ્રાહ યાન્તં હનૂમન્તં મૈનાકોઽહં મહાકપે ॥ ૩૦॥

સમુદ્રેણ સમાદિષ્ટસ્ત્વદ્વિશ્રામાય મારુતે ।
આગચ્છામૃતકલ્પાનિ જગ્ધ્વા પક્વફલાનિ મે ॥ ૩૧॥

વિશ્રમ્યાત્ર ક્ષણં પશ્ચાદ્ગમિષ્યસિ યથાસુખમ્ ।
એવમુક્તોઽથ તં પ્રાહ હનૂમાન્મારુતાત્મજઃ ॥ ૩૨॥

ગચ્છતો રામકાર્યાર્થં ભક્ષણં મે કથં ભવેત્ ।
વિશ્રામો વા કથં મે સ્યાદ્ગન્તવ્યં ત્વરિતં મયા ॥ ૩૩॥

ઇત્યુક્ત્વા સ્પૃષ્ટશિખરઃ કરાગ્રેણ યયૌ કપિઃ ।
કિઞ્ચિદ્દૂરં ગતસ્યાસ્ય છાયાં છાયાગ્રહોઽગ્રહીત્ ॥ ૩૪॥

સિંહિકા નામ સા ઘોરા જલમધ્યે સ્થિતા સદા ।
આકાશગામિનાં છાયામાક્રમ્યાકૃષ્ય ભક્ષયેત્ ॥ ૩૫॥

તયા ગૃહીતો હનુમાંશ્ચિન્તયામાસ વીર્યવાન્ ।
કેનેદં મે કૃતં વેગરોધનં વિઘ્નકારિણા ॥ ૩૬॥

દૃશ્યતે નૈવ કોઽપ્યત્ર વિસ્મયો મે પ્રજાયતે ।
એવં વિચિન્ત્ય હનુમાનધો દૃષ્ટિં પ્રસારયત્ ॥ ૩૭॥

તત્ર દૃષ્ટ્વા મહાકાયાં સિંહિકાં ઘોરરૂપિણીમ્ ।

પપાત સલિલે તૂર્ણં પદ્ભ્યામેવાહનદ્રુષા ॥ ૩૮॥

પુનરુત્પ્લુત્ય હનૂમાન્ દક્ષિણાભિમુખો યયૌ ।
તતો દક્ષિણમાસાદ્ય કૂલં નાનાફલદ્રુમમ્ ॥ ૩૯॥

નાનાપક્ષિમૃગાકીર્ણં નાનાપુષ્પલતાવૃતમ્ ।
તતો દદર્શ નગરં ત્રિકૂટાચલમૂર્ધનિ ॥ ૪૦॥

પ્રાકારૈર્બહુભિર્યુક્તં પરિખાભિશ્ચ સર્વતઃ ।
પ્રવેક્ષ્યામિ કથં લઙ્કામિતિ ચિન્તાપરોઽભવત્ ॥ ૪૧॥

રાત્રૌ વેક્ષ્યામિ સૂક્ષ્મોઽહં લઙ્કાં રાવણપાલિતામ્ ।
એવં વિચિન્ત્ય તત્રૈવ સ્થિત્વા લઙ્કાં જગામ સઃ ॥ ૪૨॥

ધૃત્વા સૂક્ષ્મં વપુર્દ્વારં પ્રવિવેશ પ્રતાપવાન્ ।
તત્ર લઙ્કાપુરી સાક્ષાદ્રાક્ષસીવેષધારિણી ॥ ૪૩॥

પ્રવિશન્તં હનૂમન્તં દૃષ્ટ્વા લઙ્કા વ્યતર્જયત્ ।
કસ્ત્વં વાનરરૂપેણ મામનાદૃત્ય લઙ્કિનીમ્ ॥ ૪૪॥

પ્રવિશ્ય ચોરવદ્રાત્રૌ કિં ભવાન્ કર્તુમિચ્છતિ ।
ઇત્યુક્ત્વા રોષતામ્રાક્ષી પાદેનાભિજઘાન તમ્ ॥ ૪૫॥

હનુમાનપિ તાં વામમુષ્ટિનાવજ્ઞયાહનત્ ।
તદૈવ પતિતા ભૂમૌ રક્તમુદ્વમતી ભૃશમ્ ॥ ૪૬॥

ઉત્થાય પ્રાહ સા લઙ્કા હનૂમન્તં મહાબલમ્ ।
હનૂમન્ ગચ્છ ભદ્રં તે જિતા લઙ્કા ત્વયાનઘ ॥ ૪૭॥

પુરાહં બ્રહ્મણા પ્રોક્તા હ્યષ્ટાવિંશતિપર્યયે ।
ત્રેતાયુગે દાશરથી રામો નારાયણોઽવ્યયઃ ॥ ૪૮॥

જનિષ્યતે યોગમાયા સીતા જનકવેશ્મનિ ।
ભૂભારહરણાર્થાય પ્રાર્થિતોઽયં મયા ક્વચિત્ ॥ ૪૯॥

સભાર્યો રાઘવો ભ્રાત્રા ગમિષ્યતિ મહાવનમ્ ।
તત્ર સીતાં મહામાયાં રાવણોઽપહરિષ્યતિ ॥ ૫૦॥

પશ્ચાદ્રામેણ સાચિવ્યં સુગ્રીવસ્ય ભવિષ્યતિ ।
સુગ્રીવો જાનકીં દ્રષ્ટું વાનરાન્ પ્રેષયિષ્યતિ ॥ ૫૧॥

તત્રૈકો વાનરો રાત્રાવાગમિષ્યતિ તેઽન્તિકમ્ ।
ત્વયા ચ ભર્ત્સિતઃ સોઽપિ ત્વાં હનિષ્યતિ મુષ્ટિના ॥ ૫૨॥

તેનાહતા ત્વં વ્યથિતા ભવિષ્યસિ યદાનઘે ।
તદૈવ રાવણસ્યાન્તો ભવિષ્યતિ ન સંશયઃ ॥ ૫૩॥

તસ્માત્ ત્વયા જિતા લઙ્કા જિતં સર્વં ત્વયાનઘ ।
રાવણાન્તઃપુરવરે ક્રીડાકાનનમુત્તમમ્ ॥ ૫૪॥

તન્મધ્યેઽશોકવનિકા દિવ્યપાદપસઙ્કુલા ।
અસ્તિ તસ્યાં મહાવૃક્ષઃ શિંશપા નામ મધ્યગઃ ॥ ૫૫॥

તત્રાસ્તે જાનકી ઘોરરાક્ષસીભિઃ સુરક્ષિતા ।
દૃષ્ટ્વૈવ ગચ્છ ત્વરિતં રાઘવાય નિવેદય ॥ ૫૬॥

ધન્યાહમપ્યદ્ય ચિરાય રાઘવ-
સ્મૃતિર્મમાસીદ્ભવપાશમોચિની ।
તદ્ભક્તસઙ્ગોઽપ્યતિદુર્લભો મમ
પ્રસીદતાં દાશરથિઃ સદા હૃદિ ॥ ૫૭॥

ઉલ્લઙ્ઘિતેઽબ્ધૌ પવનાત્મજેન
ધરાસુતાયાશ્ચ દશાનનસ્ય ।
પુસ્ફોર વામાક્ષિ ભુજશ્ચ તીવ્રં
રામસ્ય દક્ષાઙ્ગમતીન્દ્રિયસ્ય ॥ ૫૮॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે સુન્દરકાણ્ડે
પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

તતો જગામ હનુમાન્ લઙ્કાં પરમશોભનામ્ ।
રાત્રૌ સૂક્ષ્મતનુર્ભૂત્વા બભ્રામ પરિતઃ પુરીમ્ ॥ ૧॥

સીતાન્વેષણકાર્યાર્થી પ્રવિવેશ નૃપાલયમ્ ।
તત્ર સર્વપ્રદેશેષુ વિવિચ્ય હનુમાન્ કપિઃ ॥ ૨॥

નાપશ્યજ્જાનકીં સ્મૃત્વા તતો લઙ્કાભિભાષિતમ્ ।
જગામ હનુમાન્ શીઘ્રમશોકવનિકાં શુભામ્ ॥ ૩॥

સુરપાદપસમ્બાધાં રત્નસોપાનવાપિકામ્ ।
નાનાપક્ષિમૃગાકીર્ણાં સ્વર્ણપ્રાસાદશોભિતામ્ ॥ ૪॥

ફલૈરાનમ્રશાખાગ્રપાદપૈઃ પરિવારિતામ્ ।
વિચિન્વન્ જાનકીં તત્ર પ્રતિવૃક્ષં મરુત્સુતઃ ॥ ૫॥

દદર્શાભ્રંલિહં તત્ર ચૈત્યપ્રાસાદમુત્તમમ્ ।
દૃષ્ટ્વા વિસ્મયમાપન્નો મણિસ્તમ્ભશતાન્વિતમ્ ॥ ૬॥

સમતીત્ય પુનર્ગત્વા કિઞ્ચિદ્દૂરં સ મારુતિઃ ।
દદર્શ શિંશપાવૃક્ષમત્યન્તનિબિડચ્છદમ્ ॥ ૭॥

અદૃષ્ટાતપમાકીર્ણં સ્વર્ણવર્ણવિહઙ્ગમમ્ ।
તન્મૂલે રાક્ષસીમધ્યે સ્થિતાં જનકનન્દિનીમ્ ॥ ૮॥

દદર્શ હનુમાન્ વીરો દેવતામિવ ભૂતલે ।
એકવેણીં કૃશાં દીનાં મલિનામ્બરધારિણીમ્ ॥ ૯॥

ભુમૌ શયાનાં શોચન્તીં રામરામેતિ ભાષિણીમ્ ।
ત્રાતારં નાધિગચ્છન્તીમુપવાસકૃશાં શુભામ્ ॥ ૧૦॥

શાખાન્તચ્છદમધ્યસ્થો દદર્શ કપિકુઞ્જરઃ ।
કૃતાર્થોઽહં કૃતાર્થોઽહં દૃષ્ટ્વા જનકનન્દિનીમ્ ॥ ૧૧॥

મયૈવ સાધિતં કાર્યં રામસ્ય પરમાત્મનઃ ।
તતઃ કિલકિલાશબ્દો બભૂવાન્તઃપુરાદ્બહિઃ ॥ ૧૨॥

કિમેતદિતિ સઁલ્લીનો વૃક્ષપત્રેષુ મારુતિઃ ।
આયાન્તં રાવણં તત્ર સ્ત્રીજનૈઃ પરિવારિતમ્ ॥ ૧૩॥

દશાસ્યં વિંશતિભુજં નીલાઞ્જનચયોપમમ્ ।
દૃષ્ટ્વા વિસ્મયમાપન્નઃ પત્રખણ્ડેષ્વલીયત ॥ ૧૪॥

રાવણો રાઘવેણાશુ મરણં મે કથં ભવેત્ ।
સીતાર્થમપિ નાયાતિ રામઃ કિં કારણં ભવેત્ ॥ ૧૫॥

ઇત્યેવં ચિન્તયન્નિત્યં રામમેવ સદા હૃદિ ।

તસ્મિન્ દિનેઽપરરાત્રૌ રાવણો રાક્ષસાધિપઃ ॥ ૧૬॥

સ્વપ્ને રામેણ સન્દિષ્ટઃ કશ્ચિદાગત્ય વાનરઃ ।
કામરૂપધરઃ સૂક્ષ્મો વૃક્ષાગ્રસ્થોઽનુપશ્યતિ ॥ ૧૭॥

ઇતિ દૃષ્ટ્વાદ્ભુતં સ્વપ્નં સ્વાત્મન્યેવાનુચિન્ત્ય સઃ ।
સ્વપ્નઃ કદાચિત્સત્યઃ સ્યાદેવં તત્ર કરોમ્યહમ્ ॥ ૧૮॥

જાનકીં વાક્શરૈર્વિદ્ધ્વા દુઃખિતાં નિતરામહમ્ ।
કરોમિ દૃષ્ટ્વા રામાય નિવેદયતુ વાનરઃ ॥ ૧૯॥

ઇત્યેવં ચિન્તયન્ સીતાસમીપમગમદ્દ્રુતમ્ ।
નૂપુરાણાં કિઙ્કિણીનાં શ્રુત્વા શિઞ્જિતમઙ્ગના ॥ ૨૦॥

સીતા ભીતા લીયમાના સ્વાત્મન્યેવ સુમધ્યમા ।
અધોમુખ્યશ્રુનયના સ્થિતા રામાર્પિતાન્તરા ॥ ૨૧॥

રાવણોઽપિ તદા સીતામાલોક્યાહ સુમધ્યમે ।
માં દૃષ્ટ્વા કિં વૃથા સુભ્રુ સ્વાત્મન્યેવ વિલીયસે ॥ ૨૨॥

રામો વનચરાણાં હિ મધ્યે તિષ્ઠતિ સાનુજઃ ।
કદાચિદ્દૃશ્યતે કૈશ્ચિત્કદાચિન્નૈવ દૃશ્યતે ॥ ૨૩॥

મયા તુ બહુધા લોકાઃ પ્રેષિતાસ્તસ્ય દર્શને ।
ન પશ્યન્તિ પ્રયત્નેન વીક્ષમાણાઃ સમન્તતઃ ॥ ૨૪॥

કિં કરિષ્યસિ રામેણ નિઃસ્પૃહેણ સદા ત્વયિ ।
ત્વયા સદાલિઙ્ગિતોઽપિ સમીપસ્થોઽપિ સર્વદા ॥ ૨૫॥

હૃદયેઽસ્ય ન ચ સ્નેહસ્ત્વયિ રામસ્ય જાયતે ।
ત્વત્કૃતાન્ સર્વભોગાંશ્ચ ત્વદ્ગુણાનપિ રાઘવઃ ॥ ૨૬॥

ભુઞ્જાનોઽપિ ન જાનાતિ કૃતઘ્નો નિર્ગુણોઽધમઃ ।
ત્વમાનીતા મયા સાધ્વી દુઃખશોકસમાકુલા ॥ ૨૭॥

ઇદાનીમપિ નાયાતિ ભક્તિહીનઃ કથં વ્રજેત્ ।
નિઃસત્ત્વો નિર્મમો માની મૂઢઃ પણ્ડિતમાનવાન્ ॥ ૨૮॥

નરાધમં ત્વદ્વિમુખં કિં કરિષ્યસિ ભામિનિ ।
ત્વય્યતીવ સમાસક્તં માં ભજસ્વાસુરોત્તમમ્ ॥ ૨૯॥

દેવગન્ધર્વનાગાનાં યક્ષકિન્નરયોષિતામ્ ।
ભવિષ્યસિ નિયોક્ત્રી ત્વં યદિ માં પ્રતિપદ્યસે ॥ ૩૦॥

રાવણસ્ય વચઃ શ્રુત્વા સીતાઽમર્ષસમન્વિતા ।
ઉવાચાધોમુખી ભૂત્વા નિધાય તૃણમન્તરે ॥ ૩૧॥

રાઘવાદ્બિભ્યતા નૂનં ભિક્ષુરૂપં ત્વયા ધૃતમ્ ।
રહિતે રાઘવાભ્યાં ત્વં શુનીવ હવિરધ્વરે ॥ ૩૨॥

હૃતવાનસિ માં નીચ તત્ફલં પ્રાપ્સ્યસેઽચિરાત્ ।
યદા રામશરાઘાતવિદારિતવપુર્ભવાન્ ॥ ૩૩॥

જ્ઞાસ્યસેઽમાનુષં રામં ગમિષ્યસિ યમાન્તિકમ્ ।
સમુદ્રં શોષયિત્વા વા શરૈર્બદ્ધ્વાથ વારિધિમ્ ॥ ૩૪॥

હન્તું ત્વાં સમરે રામો લક્ષ્મણેન સમન્વિતઃ ।
આગમિષ્યત્યસન્દેહો દ્રક્ષ્યસે રાક્ષસાધમ ॥ ૩૫॥

ત્વાં સપુત્રં સહબલં હત્વા નેષ્યતિ માં પુરમ્ ॥

શ્રુત્વા રક્ષઃપતિઃ ક્રુદ્ધો જાનક્યાઃ પરુષાક્ષરમ્ ॥ ૩૬॥

વાક્યં ક્રોધસમાવિષ્ટઃ ખડ્ગમુદ્યમ્ય સત્વરઃ ।
હન્તું જનકરાજસ્ય તનયાં તામ્રલોચનઃ ॥ ૩૭॥

મન્દોદરી નિવાર્યાહ પતિં પતિહિતે રતા ।
ત્યજૈનાં માનુષીં દીનાં દુઃખિતાં કૃપણાં કૃશામ્ ॥ ૩૮॥

દેવગન્ધર્વનાગાનાં બહ્વ્યઃ સન્તિ વરાઙ્ગનાઃ ।
ત્વામેવ વરયન્ત્યુચ્ચૈર્મદમત્તવિલોચનાઃ ॥ ૩૯॥

તતોઽબ્રવીદ્દશગ્રીવો રાક્ષસીર્વિકૃતાનનાઃ ।
યથા મે વશગા સીતા ભવિષ્યતિ સકામના ।
તથા યતધ્વં ત્વરિતં તર્જનાદરણાદિભિઃ ॥ ૪૦॥

દ્વિમાસાભ્યન્તરે સીતા યદિ મે વશગા ભવેત્ ।
તદા સર્વસુખોપેતા રાજ્યં ભોક્ષ્યતિ સા મયા ॥ ૪૧॥

યદિ માસદ્વયાદૂર્ધ્વં મચ્છય્યાં નાભિનન્દતિ ।
તદા મે પ્રાતરાશાય હત્વા કુરુત માનુષીમ્ ॥ ૪૨॥

ઇત્યુક્ત્વા પ્રયયૌ સ્ત્રીભી રાવણોઽન્તઃપુરાલયમ્ ।
રાક્ષસ્યો જાનકીમેત્ય ભીષયન્ત્યઃ સ્વતર્જનૈઃ ॥ ૪૩॥

તત્રૈકા જાનકીમાહ યૌવનં તે વૃથા ગતમ્ ।
રાવણેન સમાસાદ્ય સફલં તુ ભવિષ્યતિ ॥ ૪૪॥

અપરા ચાહ કોપેન કિં વિલમ્બેન જાનકિ ।
ઇદાનીં છેદ્યતામઙ્ગં વિભજ્ય ચ પૃથક્ પૃથક્ ॥ ૪૫॥

અન્યા તુ ખડ્ગમુદ્યમ્ય જાનકીં હન્તુમુદ્યતા ।
અન્યા કરાલવદના વિદાર્યાસ્યમભીષયત્ ॥ ૪૬॥

એવં તાં ભીષયન્તીસ્તા રાક્ષસીર્વિકૃતાનનાઃ ।
નિવાર્ય ત્રિજટા વૃદ્ધા રાક્ષસી વાક્યમબ્રવીત્ ॥ ૪૭॥

શ‍ૃણુધ્વં દુષ્ટરાક્ષસ્યો મદ્વાક્યં વો હિતં ભવેત્ ॥ ૪૮॥

ન ભીષયધ્વં રુદતીં નમસ્કુરુત જાનકીમ્ ।
ઇદાનીમેવ મે સ્વપ્ને રામઃ કમલલોચનઃ ॥ ૪૯॥

આરુહ્યૈરાવતં શુભ્રં લક્ષ્મણેન સમાગતઃ ।
દગ્ધ્વા લઙ્કાપુરીં સર્વાં હત્વા રાવણમાહવે ॥ ૫૦॥

આરોપ્ય જાનકીં સ્વાઙ્કે સ્થિતો દૃષ્ટોઽગમૂર્ધનિ ।
રાવણો ગોમયહ્રદે તૈલાભ્યક્તો દિગમ્બરઃ ॥ ૫૧॥

અગાહત્પુત્રપૌત્રૈશ્ચ કૃત્વા વદનમાલિકામ્ ।
વિભીષણસ્તુ રામસ્ય સન્નિધૌ હૃષ્ટમાનસઃ ॥ ૫૨॥

સેવાં કરોતિ રામસ્ય પાદયોર્ભક્તિસંયુતઃ ।
સર્વથા રાવણં રામો હત્વા સકુલમઞ્જસા ॥ ૫૩॥

વિભીષણાયાધિપત્યં દત્ત્વા સીતાં શુભાનનામ્ ।
અઙ્કે નિધાય સ્વપુરીં ગમિષ્યતિ ન સંશયઃ ॥ ૫૪॥

ત્રિજટાયા વચઃ શ્રુત્વા ભીતાસ્તા રાક્ષસસ્ત્રિયઃ ।
તૂષ્ણીમાસંસ્તત્ર તત્ર નિદ્રાવશમુપાગતાઃ ॥ ૫૫॥

તર્જિતા રાક્ષસીભિઃ સા સીતા ભીતાતિવિહ્વલા ।
ત્રાતારં નાધિગચ્છન્તી દુઃખેન પરિમૂર્ચ્છિતા ॥ ૫૬॥

અશ્રુભિઃ પૂર્ણનયના ચિન્તયન્તીદમબ્રવીત્ ।
પ્રભાતે ભક્ષયિષ્યન્તિ રાક્ષસ્યો માં ન સંશયઃ ।
ઇદાનીમેવ મરણં કેનોપાયેન મે ભવેત્ ॥ ૫૭॥

એવં સુદુઃખેન પરિપ્લુતા સા
        વિમુક્તકણ્ઠં રુદતી ચિરાય ।
આલમ્બ્ય શાખાં કૃતનિશ્ચયા મૃતૌ
        ન જાનતી કઞ્ચિદુપાયમઙ્ગના ॥ ૫૮॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે સુન્દરકાણ્ડે
દ્વિતીયઃ સર્ગઃ ॥ ૨॥

## ॥ તૃતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

ઉદ્બન્ધનેન વા મોક્ષ્યે શરીરં રાઘવં વિના ।
જીવિતેન ફલં કિં સ્યાન્મમ રક્ષોઽધિમધ્યતઃ ॥ ૧॥

દીર્ઘા વેણી મમાત્યર્થમુદ્બન્ધાય ભવિષ્યતિ ।
એવં નિશ્ચિતબુદ્ધિં તાં મરણાયાથ જાનકીમ્ ॥ ૨॥

વિલોક્ય હનુમાન્ કિઞ્ચિદ્વિચાર્યૈતદભાષત ।
શનૈઃ શનૈઃ સૂક્ષ્મરૂપો જાનક્યાઃ શ્રોત્રગં વચઃ ॥ ૩॥

ઇક્ષ્વાકુવંશસમ્ભૂતો રાજા દશરથો મહાન્ ।
અયોધ્યાધિપતિસ્તસ્ય ચત્વારો લોકવિશ્રુતાઃ ॥ ૪॥

પુત્રા દેવસમાઃ સર્વે લક્ષણૈરુપલક્ષિતાઃ ।
રામશ્ચલક્ષ્મણશ્ચૈવ ભરતશ્ચૈવ શત્રુહા ॥ ૫॥

જ્યેષ્ઠો રામઃ પિતુર્વાક્યાદ્દણ્ડકારણ્યમાગતઃ ।
લક્ષ્મણેન સહ ભ્રાત્રા સીતયા ભાર્યયા સહ ॥ ૬॥

ઉવાસ ગૌતમીતીરે પઞ્ચવટ્યાં મહામનાઃ ।
તત્ર નીતા મહાભાગા સીતા જનકનન્દિની ॥ ૭॥

રહિતે રામચન્દ્રેણ રાવણેન દુરાત્મના ।
તતો રામોઽતિદુઃખાર્તો માર્ગમાણોઽથ જાનકીમ્ ॥ ૮॥

જટાયુષં પક્ષિરાજમપશ્યત્પતિતં ભુવિ ।
તસ્મૈ દત્ત્વા દિવં શીઘ્રમૃષ્યમૂકમુપાગમત્ ॥ ૯॥

સુગ્રીવેણ કૃતા મૈત્રી રામસ્ય વિદિતાત્મનઃ ।
તદ્ભાર્યાહારિણં હત્વા વાલિનં રઘુનન્દનઃ ॥ ૧૦॥

રાજ્યેઽભિષિચ્ય સુગ્રીવં મિત્રકાર્યં ચકાર સઃ ।
સુગ્રીવસ્તુ સમાનાય્ય વાનરાન્ વાનરપ્રભુઃ ॥ ૧૧॥

પ્રેષયામાસ પરિતો વાનરાન્ પરિમાર્ગણે ।
સીતાયાસ્તત્ર ચૈકોઽહં સુગ્રીવસચિવો હરિઃ ॥ ૧૨॥

સમ્પાતિવચનાચ્છીઘ્રમુલ્લઙ્ઘ્ય શતયોજનમ્ ।
સમુદ્રં નગરીં લઙ્કાં વિચિન્વન્ જાનકીં શુભામ્ ॥ ૧૩॥

શનૈરશોકવનિકાં વિચિન્વન્ શિંશપાતરુમ્ ।
અદ્રાક્ષં જાનકીમત્ર શોચન્તીં દુઃખસમ્પ્લુતામ્ ॥ ૧૪॥

રામસ્ય મહિષીં દેવીં કૃતકૃત્યોઽહમાગતઃ ।
ઇત્યુક્ત્વોપરરામાથ મારુતિર્બુદ્ધિમત્તરઃ ॥ ૧૫॥

સીતા ક્રમેણ તત્સર્વં શ્રુત્વા વિસ્મયમાયયૌ ।
કિમિદં મે શ્રુતં વ્યોમ્નિ વાયુના સમુદીરિતમ્ ॥ ૧૬॥

સ્વપ્નો વા મે મનોભ્રાન્તિર્યદિ વા સત્યમેવ તત્ ।
નિદ્રા મે નાસ્તિ દુઃખેન જાનામ્યેતત્કુતો ભ્રમઃ ॥ ૧૭॥

યેન મે કર્ણપીયુષં વચનં સમુદીરિતમ્ ।
સ દૃશ્યતાં મહાભાગઃ પ્રિયવાદી મમાગ્રતઃ ॥ ૧૮॥

શ્રુત્વા તજ્જાનકીવાક્યં હનુમાન્ પત્રખણ્ડતઃ ।
અવતીર્ય શનૈઃ સીતાપુરતઃ સમવસ્થિતઃ ॥ ૧૯॥

કલવિઙ્કપ્રમાણાઙ્ગો રક્તાસ્યઃ પીતવાનરઃ ।
નનામ શનકૈઃ સીતાં પ્રાઞ્જલિઃ પુરતઃ સ્થિતઃ ॥ ૨૦॥

દૃષ્ટ્વા તં જાનકી ભીતા રાવણોઽયમુપાગતઃ ।
માં મોહયિતુમાયાતો માયયા વાનરાકૃતિઃ ॥ ૨૧॥

ઇત્યેવં ચિન્તયિત્વા સા તૂષ્ણિમાસીદધોમુખી ।
પુનરપ્યાહ તાં સીતાં દેવિ યત્ત્વં વિશઙ્કસે ॥ ૨૨॥

નાહં તથાવિધો માતસ્ત્યજ શઙ્કાં મયિ સ્થિતામ્ ।
દાસોઽહં કોસલેન્દ્રસ્ય રામસ્ય પરમાત્મનઃ ॥ ૨૩॥

સચિવોઽહં હરીન્દ્રસ્ય સુગ્રીવસ્ય શુભપ્રદે ।
વાયોઃ પુત્રોઽહમખિલપ્રાણભૂતસ્ય શોભને ॥ ૨૪॥

તચ્છ્રુત્વા જાનકી પ્રાહ હનૂમન્તં કૃતાઞ્જલિમ્ ।
વાનરાણાં મનુષ્યાણાં સઙ્ગતિર્ઘટતે કથમ્ ॥ ૨૫॥

યથા ત્વં રામચન્દ્રસ્ય દાસોઽહમિતિ ભાષસે ।
તામાહ મારુતિઃ પ્રીતો જાનકીં પુરતઃ સ્થિતઃ ॥ ૨૬॥

ઋષ્યમૂકમગાદ્રામઃ શબર્યા નોદિતઃ સુધીઃ ।
સુગ્રીવો ઋષ્યમૂકસ્થો દૃષ્ટવાન્ રામલક્ષ્મણૌ ॥ ૨૭॥

ભીતો માં પ્રેષયામાસ જ્ઞાતું રામસ્ય હૃદ્ગતમ્ ।
બ્રહ્મચારિવપુર્ધૃત્વા ગતોઽહં રામસન્નિધિમ્ ॥ ૨૮॥

જ્ઞાત્વા રામસ્ય સદ્ભાવં સ્કન્ધોપરિ નિધાય તૌ ।
નીત્વા સુગ્રીવસામીપ્યં સખ્યં ચાકરવં તયોઃ ॥ ૨૯॥

સુગ્રીવસ્ય હૃતા ભાર્યા વાલિના તં રઘૂત્તમઃ ।
જઘાનૈકેન બાણેન તતો રાજ્યેઽભ્યષેચયત્ ॥ ૩૦॥

સુગ્રીવં વાનરાણાં સ પ્રેષયામાસ વાનરાન્ ।
દિગ્ભ્યો મહાબલાન્ વીરાન્ ભવત્યાઃ પરિમાર્ગણે ॥ ૩૧॥

ગચ્છન્તં રાઘવો દૃષ્ટ્વા મામભાષત સાદરમ્ ॥ ૩૨॥

ત્વયિ કાર્યમશેષં મે સ્થિતં મારુતનન્દન ।
બ્રૂહિ મે કુશલં સર્વં સીતાયૈ લક્ષ્મણસ્ય ચ ॥ ૩૩॥

અઙ્ગુલીયકમેતન્મે પરિજ્ઞાનાર્થમુત્તમમ્ ।
સીતાયૈ દીયતાં સાધુ મન્નામાક્ષરમુદ્રિતમ્ ॥ ૩૪॥

ઇત્યુક્ત્વા પ્રદદૌ મહ્યં કરાગ્રાદઙ્ગુલીયકમ્ ।
પ્રયત્નેન મયાનીતં દેવિ પશ્યાઙ્ગુલીયકમ્ ॥ ૩૫॥

ઇત્યુક્ત્વા પ્રદદૌ દેવ્યૈ મુદ્રિકાં મારુતાત્મજઃ ।
નમસ્કૃત્ય સ્થિતો દૂરાદ્બદ્ધાઞ્જલિપુટો હરિઃ ॥ ૩૬॥

દૃષ્ટ્વા સીતા પ્રમુદિતા રામનામાઙ્કિતાં તદા ।
મુદ્રિકાં શિરસા ધૃત્વા સ્રવદાનન્દનેત્રજા ॥ ૩૭॥

કપે મે પ્રાણદાતા ત્વં બુદ્ધિમાનસિ રાઘવે ।
ભક્તોઽસિ પ્રિયકારી ત્વં વિશ્વાસોઽસ્તિ તવૈવ હિ ॥ ૩૮॥

નો ચેન્મત્સન્નિધિં ચાન્યં પુરુષં પ્રેષયેત્કથમ્ ।
હનૂમન્ દૃષ્ટમખિલં મમ દુઃખાદિકં ત્વયા ॥ ૩૯॥

સર્વં કથય રામાય યથા મે જાયતે દયા ।
માસદ્વયાવધિ પ્રાણાઃ સ્થાસ્યન્તિ મમ સત્તમ ॥ ૪૦॥

નાગમિષ્યતિ ચેદ્રામો ભક્ષયિષ્યતિ માં ખલઃ ।
અતઃ શીઘ્રં કપીન્દ્રેણ સુગ્રીવેણ સમન્વિતઃ ॥ ૪૧॥

વાનરાનીકપૈઃ સાર્ધં હત્વા રાવણમાહવે ।
સપુત્રં સબલં રામો યદિ માં મોચયેત્પ્રભુઃ ॥ ૪૨॥

તત્તસ્ય સદૃશં વીર્યં વીર વર્ણય વર્ણિતમ્ ।
યથા માં તારયેદ્રામો હત્વા શીઘ્રં દશાનનમ્ ॥ ૪૩॥

તથા યતસ્વ હનુમન્ વાચા ધર્મમવાપ્નુહિ ।
હનુમાનપિ તામાહ દેવિ દૃષ્ટો યથા મયા ॥ ૪૪॥

રામઃ સલક્ષ્મણઃ શીઘ્રમાગમિષ્યતિ સાયુધઃ ।
સુગ્રીવેણ સસૈન્યેન હત્વા દશમુખં બલાત્ ॥ ૪૫॥

સમાનેષ્યતિ દેવિ ત્વામયોધ્યાં નાત્ર સંશયઃ ।
તમાહ જાનકી રામઃ કથં વારિધિમાતતમ્ ॥ ૪૬॥

તીર્ત્વાયાસ્યત્યમેયાત્મા વાનરાનીકપૈઃ સહ ।
હનૂમાનાહ મે સ્કન્ધાવારુહ્ય પુરુષર્ષભૌ ॥ ૪૭॥

આયાસ્યતઃ સસૈન્યશ્ચ સુગ્રીવો વાનરેશ્વરઃ ।
વિહાયસા ક્ષણેનૈવ તીર્ત્વા વારિધિમાતતમ્ ॥ ૪૮॥

નિર્દહિષ્યતિ રક્ષૌઘાંસ્ત્વત્કૃતે નાત્ર સંશયઃ ।

અનુજ્ઞાં દેહિ મે દેવિ ગચ્છામિ ત્વરયાન્વિતઃ ॥ ૪૯॥

દ્રષ્ટું રામં સહ ભ્રાત્રા ત્વરયામિ તવાન્તિકમ્ ।
દેવિ કિઞ્ચિદભિજ્ઞાનં દેહિ મે યેન રાઘવઃ ॥ ૫૦॥

વિશ્વસેન્માં પ્રયત્નેન તતો ગન્તા સમુત્સુકઃ ।
તતઃ કિઞ્ચિદ્વિચાર્યાથ સીતા કમલલોચના ॥ ૫૧॥

વિમુચ્ય કેશપાશાન્તે સ્થિતં ચૂડામણિં દદૌ ।
અનેન વિશ્વસેદ્રામસ્ત્વાં કપીન્દ્ર સલક્ષ્મણઃ ॥ ૫૨॥

અભિજ્ઞાનાર્થમન્યચ્ચ વદામિ તવ સુવ્રત ।
ચિત્રકૂટગિરૌ પૂર્વમેકદા રહસિ સ્થિતઃ ।
મદઙ્કે શિર આધાય નિદ્રાતિ રઘુનન્દનઃ ॥ ૫૩॥

ઐન્દ્રઃ કાકસ્તદાગત્ય નખૈસ્તુણ્ડેન ચાસકૃત્ ।
મત્પાદાઙ્ગુષ્ઠમારક્તં વિદદારામિષાશયા ॥ ૫૪॥

તતો રામઃ પ્રબુદ્ધ્યાથ દૃષ્ટ્વા પાદં કૃતવ્રણમ્ ।
કેન ભદ્રે કૃતં ચૈતદ્વિપ્રિયં મે દુરાત્મના ॥ ૫૫॥

ઇત્યુક્ત્વા પુરતોઽપશ્યદ્વાયસં માં પુનઃ પુનઃ ।
અભિદ્રવન્તં રક્તાક્તનખતુણ્ડં ચુકોપ હ ॥ ૫૬॥

તૃણમેકમુપાદાય દિવ્યાસ્ત્રેણાભિયોજ્ય તત્ ।
ચિક્ષેપ લીલયા રામો વાયસોપરિ તજ્જ્વલન્ ॥ ૫૭॥

અભ્યદ્રવદ્વાયસશ્ચ ભીતો લોકાન્ ભ્રમન્ પુનઃ ।
ઇન્દ્રબ્રહ્માદિભિશ્ચાપિ ન શક્યો રક્ષિતું તદા ॥ ૫૮॥

રામસ્ય પાદયોરગ્રેઽપતદ્ભીત્યા દયાનિધેઃ ।
શરણાગતમાલોક્ય રામસ્તમિદમબ્રવીત્ ॥ ૫૯॥

અમોઘમેતદસ્ત્રં મે દત્ત્વૈકાક્ષિમિતો વ્રજ ।
સવ્યં દત્ત્વા ગતઃ કાક એવં પૌરુષવાનપિ ॥ ૬૦॥

ઉપેક્ષતે કિમર્થં મામિદાનીં સોઽપિ રાઘવઃ ।
હનૂમાનપિ તામાહ શ્રુત્વા સીતાનુભાષિતમ્ ॥ ૬૧॥

દેવિ ત્વાં યદિ જાનાતિ સ્થિતામત્ર રઘૂત્તમઃ ।
કરિષ્યતિ ક્ષણાદ્ભસ્મ લઙ્કાં રાક્ષસમણ્ડિતામ્ ॥ ૬૨॥

જાનકી પ્રાહ તં વત્સ કથં ત્વં યોત્સ્યસેઽસુરૈઃ ।
અતિસૂક્ષ્મવપુઃ સર્વે વાનરાશ્ચ ભવાદૃશાઃ ॥ ૬૩ ॥

શ્રુત્વા તદ્વચનં દેવ્યૈ પૂર્વરૂપમદર્શયત્ ।
મેરુમન્દરસઙ્કાશં રક્ષોગણવિભીષણમ્ ॥ ૬૪ ॥

દૃષ્ટ્વા સીતા હનુમન્તં મહાપર્વતસન્નિભમ્ ।
હર્ષેણ મહતાવિષ્ટા પ્રાહ તં કપિકુઞ્જરમ્ ॥ ૬૫ ॥

સમર્થોઽસિ મહાસત્ત્વ દ્રક્ષ્યન્તિ ત્વાં મહાબલમ્ ।
રાક્ષસ્યસ્તે શુભઃ પન્થા ગચ્છ રામાન્તિકં દ્રુતમ્ ॥ ૬૬ ॥

બુભુક્ષિતઃ કપિઃ પ્રાહ દર્શનાત્પારણં મમ ।
ભવિષ્યતિ ફલૈઃ સર્વૈસ્તવ દૃષ્ટૌ સ્થિતૈર્હિ મે ॥ ૬૭ ॥

તથેત્યુક્તઃ સ જાનક્યા ભક્ષયિત્વા ફલં કપિઃ ।
તતઃ પ્રસ્થાપિતોઽગચ્છજ્જાનકીં પ્રણિપત્ય સઃ ।
કિઞ્ચિદ્દૂરમથો ગત્વા સ્વાત્મન્યેવાન્વચિન્તયત્ ॥ ૬૮ ॥

કાર્યાર્થમાગતો દૂતઃ સ્વામિકાર્યાવિરોધતઃ ।
અન્યત્કિઞ્ચિદસમ્પાદ્ય ગચ્છત્યધમ એવ સઃ ॥ ૬૯ ॥

અતોઽહં કિઞ્ચિદન્યચ્ચ કૃત્વા દૃષ્ટ્વાથ રાવણમ્ ।
સમ્ભાષ્ય ચ તતો રામદર્શનાર્થં વ્રજામ્યહમ્ ॥ ૭૦ ॥

ઇતિ નિશ્ચિત્ય મનસા વૃક્ષખણ્ડાન્ મહાબલઃ ।
ઉત્પાટ્યાશોકવનિકાં નિર્વૃક્ષામકરોત્ક્ષણાત્ ॥ ૭૧ ॥

સીતાઽઽશ્રયનગં ત્યક્ત્વા વનં શૂન્યં ચકાર સઃ ।
ઉત્પાટયન્તં વિપિનં દૃષ્ટ્વા રાક્ષસયોષિતઃ ॥ ૭૨ ॥

અપૃચ્છન્ જાનકીં કોઽસૌ વાનરાકૃતિરુદ્ભટઃ ॥ ૭૩ ॥

જાનક્યુવાચ ।
ભવત્ય એવ જાનન્તિ માયાં રાક્ષસનિર્મિતામ્ ।
નાહમેનં વિજાનામિ દુઃખશોકસમાકુલા ॥ ૭૪ ॥

ઇત્યુક્તાસ્ત્વરિતં ગત્વા રાક્ષસ્યો ભયપીડિતાઃ ।
હનૂમતા કૃતં સર્વં રાવણાય ન્યવેદયન્ ॥ ૭૫ ॥

દેવ કશ્ચિન્મહાસત્ત્વો વાનરાકૃતિદેહભૃત્ ।
સીતયા સહ સમ્ભાષ્ય હ્યશોકવનિકાં ક્ષણાત્ ।
ઉત્પાટ્ય ચૈત્યપ્રાસાદં બભઞ્જામિતવિક્રમઃ ॥ ૭૬॥

પ્રાસાદરક્ષિણઃ સર્વાન્ હત્વા તત્રૈવ તસ્થિવાન્ ।
તચ્છ્રુત્વા તૂર્ણમુત્થાય વનભઙ્ગં મહાઽપ્રિયમ્ ॥ ૭૭॥

કિઙ્કરાન્ પ્રેષયામાસ નિયુતં રાક્ષસાધિપઃ ।
નિભગ્નચૈત્યપ્રાસાદપ્રથમાન્તરસંસ્થિતઃ ॥ ૭૮॥

હનુમાન્ પર્વતાકારો લોહસ્તમ્ભકૃતાયુધઃ ।
કિઞ્ચિલ્લાઙ્ગૂલચલનો રક્તાસ્યો ભીષણાકૃતિઃ ॥ ૭૯॥

આપતન્તં મહાસઙ્ઘં રાક્ષસાનાં દદર્શ સઃ ।
ચકાર સિંહનાદં ચ શ્રુત્વા તે મુમુહુર્ભૃશમ્ ॥ ૮૦॥

હનુમન્તમથો દૃષ્ટ્વા રાક્ષસા ભીષણાકૃતિમ્ ।
નિર્જઘ્નુર્વિવિધાસ્ત્રૌઘૈઃ સર્વરાક્ષસઘાતિનમ્ ॥ ૮૧॥

તત ઉત્થાય હનુમાન્ મુદ્ગરેણ સમન્તતઃ ।
નિષ્પિપેષ ક્ષણાદેવ મશકાનિવ યૂથપઃ ॥ ૮૨॥

નિહતાન્ કિઙ્કરાન્ શ્રુત્વા રાવણઃ ક્રોધમૂર્ચ્છિતઃ ।
પઞ્ચ સેનાપતીંસ્તત્ર પ્રેષયામાસ દુર્મદાન્ ॥ ૮૩॥

હનૂમાનપિ તાન્ સર્વાંલ્લોહસ્તમ્ભેન ચાહનત્ ।
તતઃ ક્રુદ્ધો મન્ત્રિસુતાન્ પ્રેષયામાસ સપ્ત સઃ ॥ ૮૪॥

આગતાનપિ તાન્ સર્વાન્ પૂર્વવદ્વાનરેશ્વરઃ ।
ક્ષણાન્નિઃશેષતો હત્વા લોહસ્તમ્ભેન મારુતિઃ ॥ ૮૫॥

પૂર્વસ્થાનમુપાશ્રિત્ય પ્રતીક્ષન્ રાક્ષસાન્ સ્થિતઃ ।
તતો જગામ બલવાન્ કુમારોઽક્ષઃ પ્રતાપવાન્ ॥ ૮૬॥

તમુત્પપાત હનુમાન્ દૃષ્ટ્વાકાશે સમુદ્ગરઃ ।
ગગનાત્ત્વરિતો મૂર્ધ્નિ મુદ્ગરેણ વ્યતાડયત્ ॥ ૮૭॥

હત્વા તમક્ષં નિઃશેષં બલં સર્વં ચકાર સઃ ॥ ૮૮॥

તતઃ શ્રુત્વા કુમારસ્ય વધં રાક્ષસપુઙ્ગવઃ ।
ક્રોધેન મહતાવિષ્ટ ઇન્દ્રજેતારમબ્રવીત્ ॥ ૮૯॥

પુત્ર ગચ્છામ્યહં તત્ર યત્રાસ્તે પુત્રહા રિપુઃ ।
હત્વા તમથવા બદ્ધ્વા આનયિષ્યામિ તેઽન્તિકમ્ ॥ ૯૦॥

ઇન્દ્રજિત્પિતરં પ્રાહ ત્યજ શોકં મહામતે ।
મયિ સ્થિતે કિમર્થં ત્વં ભાષસે દુઃખિતં વચઃ ॥ ૯૧॥

બદ્ધ્વાઽઽનેષ્યે દ્રુતં તાત વાનરં બ્રહ્મપાશતઃ ।
ઇત્યુક્ત્વા રથમારુહ્ય રાક્ષસૈર્બહુભિર્વૃતઃ ॥ ૯૨॥

જગામ વાયુપુત્રસ્ય સમીપં વીરવિક્રમઃ ।
તતોઽતિગર્જિતં શ્રુત્વા સ્તમ્ભમુદ્યમ્ય વીર્યવાન્ ॥ ૯૩॥

ઉત્પપાત નભોદેશં ગરુત્માનિવ મારુતિઃ ।
તતો ભ્રમન્તં નભસિ હનૂમન્તં શિલીમુખૈઃ ॥ ૯૪॥

વિદ્ધ્વા તસ્ય શિરોભાગમિષુભિશ્ચાષ્ટભિઃ પુનઃ ।
હૃદયં પાદયુગલં ષડ્ભિરેકેન વાલધિમ્ ॥ ૯૫॥

ભેદયિત્વા તતો ઘોરં સિંહનાદમથાકરોત્ ।
તતોઽતિહર્ષાદ્ધનુમાન્ સ્તમ્ભમુદ્યસ્ય વીર્યવાન્ ॥ ૯૬॥

જઘાન સારથિં સાશ્વં રથં ચાચૂર્ણયત્ક્ષણાત્ ।
તતોઽન્યં રથમાદાય મેઘનાદો મહાબલઃ ॥ ૯૭॥

શીઘ્રં બ્રહ્માસ્ત્રમાદાય બદ્ધ્વા વાનરપુઙ્ગવમ્ ।
નિનાય નિકટં રાજ્ઞો રાવણસ્ય મહાબલઃ ॥ ૯૮॥

યસ્ય નામ સતતં જપન્તિ યે-
ઽજ્ઞાનકર્મકૃતબંધનં ક્ષણાત્ ।
સદ્ય એવ પરિમુચ્ય તત્પદં
યાન્તિ કોટિરવિભાસુરં શિવમ્ ॥ ૯૯॥

તસ્યૈવ રામસ્ય પદામ્બુજં સદા
હૃત્પદ્મમધ્યે સુનિધાય મારુતિઃ ।
સદૈવ નિર્મુક્તસમસ્તબન્ધનઃ
કિં તસ્ય પાશૈરિતરૈશ્ચ બન્ધનૈઃ ॥ ૧૦૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે સુન્દરકાણ્ડે

તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

યાન્તં કપીન્દ્રં ધૃતપાશબન્ધનં
 વિલોકયન્તં  નગરં વિભીતવત્ ।
અતાડયન્મુષ્ટિતલૈઃ સુકોપનાઃ
 પૌરાઃ સમન્તાદનુયાન્ત ઈક્ષિતુમ્ ॥ ૧॥

બ્રહ્માસ્ત્રમેનં ક્ષણમાત્રસઙ્ગમં
 કૃત્વા ગતં બ્રહ્મવરેણ સત્વરમ્ ।
જ્ઞાત્વા હનૂમાનપિ ફલ્ગુરજ્જુભિ-
 ર્ધૃતો યયૌ કાર્યવિશેષગૌરવાત્ ॥ ૨॥

સભાન્તરસ્થસ્ય ચ રાવણસ્ય તં
 પુરો નિધાયાહ બલારિજિત્તદા ।
બદ્ધો મયા બ્રહ્મવરેણ વાનરઃ
 સમાગતોઽનેન હતા મહાસુરાઃ ॥ ૩॥

યદ્યુક્તમત્રાર્ય વિચાર્ય મન્ત્રિભિ-
 ર્વિધીયતામેષ ન લૌકિકો હરિઃ ।
તતો વિલોક્યાહ સ રાક્ષસેશ્વરઃ
 પ્રહસ્તમગ્રે સ્થિતમઞ્જનાદ્રિભમ્ ॥ ૪॥

પ્રહસ્ત પૃચ્છૈનમસૌ કિમાગતઃ
 કિમત્ર કાર્યં કુત એવ વાનરઃ ।
વનં કિમર્થં સકલં વિનાશિતં
 હતાઃ કિમર્થં મમ રાક્ષસા બલાત્ ॥ ૫॥

તતઃ પ્રહસ્તો હનુમન્તમાદરાત્
 પપ્રચ્છ કેન પ્રહિતોઽસિ વાનર ।
ભયં ચ તે માસ્તુ વિમોક્ષ્યસે મયા
 સત્યં વદસ્વાખિલરાજસન્નિધૌ ॥ ૬॥

તતોઽતિહર્ષાત્પવનાત્મજો રિપું
 નિરીક્ષ્ય લોકત્રયકણ્ટકાસુરમ્ ।
વક્તું પ્રચક્રે રઘુનાથસત્કથાં
 ક્રમેણ રામં મનસા સ્મરન્મુહુઃ ॥ ૭॥

શ◌ૃણુ સ્ફુટં દેવગણાદ્યમિત્ર હે
 રામસ્ય દૂતોઽહમશેષહૃત્સ્થિતેઃ ।
યસ્યાખિલેશસ્ય હૃતાધુના ત્વયા
 ભાર્યા સ્વનાશાય શુનેવ સદ્ધવિઃ ॥ ૮॥

સ રાઘવોઽભ્યેત્ય મતઙ્ગપર્વતં
 સુગ્રીવમૈત્રીમનલસ્ય સન્નિધૌ ।
કૃત્વૈકબાણેન નિહત્ય વાલિનં
 સુગ્રીવમેવાધિપતિં ચકાર તમ્ ॥ ૯॥

સ વાનરાણામધિપો મહાબલી
 મહાબલૈર્વાનરયૂથકોટિભિઃ ।
રામેણ સાર્ધં સહ લક્ષ્મણેન ભોઃ
 પ્રવર્ષણેઽમર્ષયુતોઽવતિષ્ઠતે ॥ ૧૦॥

સઞ્ચોદિતાસ્તેન મહાહરીશ્વરા
 ધરાસુતાં માર્ગયિતું દિશો દશ ।
તત્રાહમેકઃ પવનાત્મજઃ કપિઃ
 સીતાં વિચિન્વન્ શનકૈઃ સમાગતઃ ॥ ૧૧॥

દૃષ્ટા મયા પદ્મપલાશલોચના
 સીતા કપિત્વાદ્વિપિનં વિનાશિતમ્ ।
દૃષ્ટ્વા તતોઽહં રભસા સમાગતાન્
 માં હન્તુકામાન્ ધૃતચાપસાયકાન્ ॥ ૧૨॥

મયા હતાસ્તે પરિરક્ષિતં વપુઃ
 પ્રિયો હિ દેહોઽખિલદેહિનાં પ્રભો ।
બ્રહ્માસ્ત્રપાશેન નિબધ્ય માં તતઃ
 સમાગમન્મેઘનિનાદનામકઃ ॥ ૧૩॥

સ્પૃષ્ટ્વૈવ માં બ્રહ્મવરપ્રભાવતઃ

ત્યક્ત્વા ગતં સર્વમવૈમિ રાવણ ।
તથાપ્યહં બદ્ધ ઇવાગતો હિતં
પ્રવક્તુકામઃ કરુણારસાર્દ્રધીઃ ॥। ૧૪॥

વિચાર્ય લોકસ્ય વિવેકતો ગતિં
ન રાક્ષસીં બુદ્ધિમુપૈહિ રાવણ ।
દૈવીં ગતિં સંસૃતિમોક્ષહૈતુકીં
સમાશ્રયાત્યન્તહિતાય દેહિનઃ ॥ ૧૫॥

ત્વં બ્રહ્મણો હ્યુત્તમવંશસમ્ભવઃ ।
પૌલસ્ત્યપુત્રોઽસિ કુબેરબાન્ધવઃ ।
દેહાત્મબુદ્ધ્યાપિ ચ પશ્ય રાક્ષસો
નાસ્યાત્મબુદ્ધ્યા કિમુ રાક્ષસો નહિ ॥ ૧૬॥

શરીરબુદ્ધીન્દ્રિયદુઃખસન્તતિઃ
ન તે ન ચ ત્વં તવ નિર્વિકારતઃ ।
અજ્ઞાનહેતોશ્ચ તથૈવ સન્તતેઃ
અસત્ત્વમસ્યાઃ સ્વપતો હિ દૃશ્યવત્ ॥ ૧૭॥

ઇદં તુ સત્યં તવ નાસ્તિ વિક્રિયા
વિકારહેતુર્ન ચ તેઽદ્વયત્વતઃ ।
યથા નભઃ સર્વગતં ન લિપ્યતે
તથા ભવાન્ દેહગતોઽપિ સૂક્ષ્મકઃ ।
દેહેન્દ્રિયપ્રાણશરીરસઙ્ગતઃ
ત્વાત્મેતિ બુદ્ધ્વાખિલબન્ધભાગ્ભવેત્ ॥ ૧૮॥

ચિન્માત્રમેવાહમજોઽહમક્ષરો
હ્યાનન્દભાવોઽહમિતિ પ્રમુચ્યતે ।
દેહોઽપ્યનાત્મા પૃથિવીવિકારજો
ન પ્રાણ આત્માઽનિલ એષ એવ સઃ ॥ ૧૯॥

મનોઽપ્યહઙ્કારવિકાર એવ નો
ન ચાપિ બુદ્ધિઃ પ્રકૃતેર્વિકારજા ।
આત્મા ચિદાનન્દમયોઽવિકારવાન્
દેહાદિસઙ્ઘાદ્વ્યતિરિક્ત ઈશ્વરઃ ॥ ૨૦॥

નિરઞ્જનો મુક્ત ઉપાધિતઃ સદા

જ્ઞાત્વૈવમાત્માનમિતો વિમુચ્યતે ।
અતોઽહમાત્યન્તિકમોક્ષસાધનં
વક્ષ્યે શ્ૃણુષ્વાવહિતો મહામતે ॥ ૨૧॥

વિષ્ણોર્હિ ભક્તિઃ સુવિશોધનં ધિયઃ
તતો ભવેજ્જ્ઞાનમતીવ નિર્મલમ્ ।
વિશુદ્ધતત્ત્વાનુભવો ભવેત્તતઃ
સમ્યગ્વિદિત્વા પરમં પદં વ્રજેત્ ॥ ૨૨॥

અતો ભજસ્વાદ્ય હરિં રમાપતિં
રામં પુરાણં પ્રકૃતેઃ પરં વિભુમ્ ।
વિસૃજ્ય મૌર્ખ્યં હૃદિ શત્રુભાવનાં
ભજસ્વ રામં શરણાગતપ્રિયમ્ ।
સીતાં પુરસ્કૃત્ય સપુત્રબાન્ધવો
રામં નમસ્કૃત્ય વિમુચ્યસે ભયાત્ ॥ ૨૩॥

રામં પરાત્માનમભાવયન્ જનો
ભક્ત્યા હૃદિસ્થં સુખરૂપમદ્વયમ્ ।
કથં પરં તીરમવાપ્નુયાજ્જનો
ભવામ્બુધેર્દુઃખતરઙ્ગમાલિનઃ ॥ ૨૪॥

નો ચેત્ત્વમજ્ઞાનમયેન વહ્નિના
જ્વલન્તમાત્માનમરક્ષિતારિવત્ ।
નયસ્યધોઽધઃ સ્વકૃતૈશ્ચ પાતકૈઃ
વિમોક્ષશઙ્કા ન ચ તે ભવિષ્યતિ ॥ ૨૫॥

શ્રુત્વામૃતાસ્વાદસમાનભાષિતં
તદ્વાયુસૂનોર્દશકન્ધરોઽસુરઃ ।
અમૃષ્યમાણોઽતિરુષા કપીશ્વરં
જગાદ રક્તાન્તવિલોચનો જ્વલન્ ॥ ૨૬॥

કથં મમાગ્રે વિલપસ્યભીતવત્
પ્લવઙ્ગમાનામધમોઽસિ દુષ્ટધીઃ ।
ક એષ રામઃ કતમો વનેચરો
નિહન્મિ સુગ્રીવયુતં નરાધમમ્ ॥ ૨૭॥

ત્વાં ચાદ્ય હત્વા જનકાત્મજાં તતો

નિહન્મિ રામં સહલક્ષ્મણં તતઃ ।
સુગ્રીવમગ્રે બલિનં કપીશ્વરં
સવાનરં હન્મ્યચિરેણ વાનર ।
શ્રુત્વા દશગ્રીવવચઃ સ મારુતિઃ
વિવૃદ્ધકોપેન દહન્નિવાસુરમ્ ॥ ૨૮॥

ન મે સમા રાવણકોટયોऽધમ
રામસ્ય દાસોऽહમપારવિક્રમઃ ।
શ્રુત્વાતિકોપેન હનૂમતો વચો
દશાનનો રાક્ષસમેવમબ્રવીત્ ॥ ૨૯॥

પાર્શ્વે સ્થિતં મારય ખણ્ડશઃ કપિં
પશ્યન્તુ સર્વેऽસુરમિત્રબાન્ધવાઃ ।
નિવારયામાસ તતો વિભીષણો
મહાસુરં સાયુધમુદ્યતં વધે ।
રાજન્ વધાર્હો ન ભવેત્કથઞ્ચન
પ્રતાપયુક્તૈઃ પરરાજવાનરઃ ॥ ૩૦॥

હતેऽસ્મિન્ વાનરે દૂતે વાર્તા કો વા નિવેદયેત્
રામાય ત્વં યમુદ્દિશ્ય વધાય સમુપસ્થિતઃ ॥ ૩૧॥

અતો વધસમં કિઞ્ચિદન્યચ્ચિન્તય વાનરે ।
સચિહ્નો ગચ્છતુ હરિર્યં દૃષ્ટ્વાऽऽયાસ્યતિ દ્રુતમ્ ॥ ૩૨॥

રામઃ સુગ્રીવસહિતસ્તતો યુદ્ધં ભવેત્તવ ।
વિભીષણવચઃ શ્રુત્વા રાવણોऽપ્યેતદબ્રવીત્ ॥ ૩૩॥

વાનરાણાં હિ લાઙ્ગૂલે મહામાનો ભવેત્કિલ ।
અતો વસ્ત્રાદિભિઃ પુચ્છં વેષ્ટયિત્વા પ્રયત્નતઃ ॥ ૩૪॥

વહ્નિના યોજયિત્વૈનં ભ્રામયિત્વા પુરેऽભિતઃ ।
વિસર્જયત પશ્યન્તુ સર્વે વાનરયૂથપાઃ ॥ ૩૫॥

તથેતિ શણપટ્ટૈશ્ચ વસ્ત્રૈરન્યૈરનેકશઃ ।
તૈલાક્તૈર્વેષ્ટયામાસુર્લાઙ્ગૂલં મારુતેર્દૃઢમ્ ॥ ૩૬॥

પુચ્છાગ્રે કિઞ્ચિદનલં દીપયિત્વાથ રાક્ષસાઃ ।
રજ્જુભિઃ સુદૃઢં બદ્ધ્વા ધૃત્વા તં બલિનોऽસુરાઃ ॥ ૩૭॥

સમન્તાદ્ભ્રામયામાસુશ્ચોરોઽયમિતિ વાદિનઃ ।
તૂર્યઘોષૈર્ઘોષયન્તસ્તાડયન્તો મુહુર્મુહુઃ ॥ ૩૮॥

હનૂમતાપિ તત્સર્વં સોઢં કિઞ્ચિચ્ચિકીર્ષુણા ।
ગત્વા તુ પશ્ચિમદ્વારસમીપં તત્ર મારુતિઃ ॥ ૩૯॥

સૂક્ષ્મો બભૂવ બન્ધેભ્યો નિઃસૃતઃ પુનરપ્યસૌ ।
બભૂવ પર્વતાકારસ્તત ઉત્પ્લુત્ય ગોપુરમ્ ॥ ૪૦॥

તત્રૈકં સ્તમ્ભમાદાય હત્વા તાન્ રક્ષિણઃ ક્ષણાત્ ।
વિચાર્ય કાર્યશેષં સ પ્રાસાદાગ્રાદ્ગૃહાદ્ગૃહમ્ ॥ ૪૧॥

ઉત્પ્લુત્યોપ્લુત્ય સન્દીપ્તપુચ્છેન મહતા કપિઃ ।
દદાહ લઙ્કામખિલાં સાટ્ટપ્રાસાદતોરણામ્ ॥ ૪૨॥

હા તાત પુત્ર નાથેતિ ક્રન્દમાનાઃ સમન્તતઃ ।
વ્યાપ્તાઃ પ્રાસાદશિખરેઽપ્યારૂઢા દૈત્યયોષિતઃ ॥ ૪૩॥

દેવતા ઇવ દૃશ્યન્તે પતન્ત્યઃ પાવકેઽખિલાઃ ।
વિભીષણગૃહં  ત્યક્ત્વા સર્વં ભસ્મીકૃતં પુરમ્ ॥ ૪૪॥

તત ઉત્પ્લુત્ય જલધૌ હનૂમાન્મારુતાત્મજઃ ।
લાઙ્ગૂલં મજ્જયિત્વાન્તઃ સ્વસ્થચિત્તો બભૂવ સઃ ॥ ૪૫॥

વાયોઃ પ્રિયસખિત્વાચ્ચ સીતયા પ્રાર્થિતોઽનલઃ ।
ન દદાહ હરેઃ પુચ્છં બભૂવાત્યન્તશીતલઃ ॥ ૪૬॥

યન્નામસંસ્મરણધૂતસમસ્તપાપાઃ
        તાપત્રયાનલમપીહ તરન્તિ સદ્યઃ ।
તસ્યૈવ કિં રઘુવરસ્ય વિશિષ્ટદૂતઃ
      સન્તપ્યતે કથમસૌ પ્રકૃતાનલેન ॥ ૪૭॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે સુન્દરકાણ્ડે
ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

તતઃ સીતાં નમસ્કૃત્ય હનૂમાનબ્રવીદ્વચઃ ।
આજ્ઞાપયતુ માં દેવિ ભવતી રામસન્નિધિમ્ ॥ ૧॥

ગચ્છામિ રામસ્ત્વાં દ્રષ્ટુમાગમિષ્યતિ સાનુજઃ ।
ઇત્યુક્ત્વા ત્રિઃપરિક્રમ્ય જાનકીં મારુતાત્મજઃ ॥ ૨॥

પ્રણમ્ય પ્રસ્થિતો ગન્તુમિદં વચનમબ્રવીત્ ।
દેવિ ગચ્છામિ ભદ્રં તે તૂર્ણં દ્રક્ષ્યસિ રાઘવમ્ ॥ ૩॥

લક્ષ્મણં ચ સસુગ્રીવં વાનરાયુતકોટિભિઃ ।
તતઃ પ્રાહ હનૂમન્તં જાનકી દુઃખકર્શિતા ॥ ૪॥

ત્વાં દૃષ્ટ્વા વિસ્મૃતં દુઃખમિદાનીં ત્વં ગમિષ્યસિ ।
ઇતઃ પરં કથં વર્તે રામવાર્તાશ્રુતિં વિના ॥ ૫ ॥

મારુતિરુવાચ ।
યદ્યેવં દેવિ મે સ્કન્ધમારોહ ક્ષણમાત્રતઃ
રામેણ યોજયિષ્યામિ મન્યસે યદિ જાનકિ ॥ ૬॥

સીતોવાચ ।
રામઃ સાગરમાશોષ્ય બદ્ધ્વા વા શરપઞ્જરૈઃ ।
આગત્ય વાનરૈઃ સાર્ધં હત્વા રાવણમાહવે ॥ ૭॥

માં નયેદ્યદિ રામસ્ય કીર્તિર્ભવતિ શાશ્વતી ।
અતો ગચ્છ કથં ચાપિ પ્રાણાન્ સન્ધારયામ્યહમ્ ॥ ૮॥

ઇતિ પ્રસ્થાપિતો વીરઃ સીતયા પ્રણિપત્ય તામ્ ।
જગામ પર્વતસ્યાગ્રે ગન્તું પારં મહોદધેઃ ॥ ૯॥

તત્ર ગત્વા મહાસત્ત્વઃ પાદાભ્યાં પીડયન્ ગિરિમ્ ।
જગામ વાયુવેગેન પર્વતશ્ચ મહીતલમ્ ॥ ૧૦॥

ગતો મહીસમાનત્વં ત્રિંશદ્યોજનમુચ્છ્રિતઃ ।
મારુતિર્ગગનાન્તઃસ્થો મહાશબ્દં ચકાર સઃ ॥ ૧૧॥

તં શ્રુત્વા વાનરાઃ સર્વે જ્ઞાત્વા મારુતિમાગતમ્ ।

હર્ષેણ મહતાવિષ્ટાઃ શબ્દં ચક્રુર્મહાસ્વનમ્ ॥ ૧૨॥

શબ્દેનૈવ વિજાનીમઃ કૃતકાર્યઃ સમાગતઃ ।
હનૂમાનેવ પશ્યધ્વં વાનરા વાનરર્ષભમ્ ॥ ૧૩॥

એવં બ્રુવત્સુ વીરેષુ વાનરેષુ સ મારુતિઃ ।
અવતીર્ય ગિરેર્મુર્ધ્નિ વાનરાનિદમબ્રવીત્ ॥ ૧૪॥

દૃષ્ટા સીતા મયા લઙ્કા ધર્ષિતા ચ સકાનના ।
સમ્ભાષિતો દશગ્રીવસ્તતોઽહં પુનરાગતઃ ॥ ૧૫॥

ઇદાનીમેવ ગચ્છામો રામસુગ્રીવસન્નિધિમ્ ।
ઇત્યુક્ત્વા વાનરાઃ સર્વે હર્ષેણાલિઙ્ગ્ય મારુતિમ્ ॥ ૧૬॥

કેચિચ્ચુચુમ્બુર્લાઙ્ગૂલં નનૃતુઃ કેચિદુત્સુકાઃ ।
હનૂમતા સમેતાસ્તે જગ્મુઃ પ્રસ્રવણં ગિરિમ્ ॥ ૧૭॥

ગચ્છન્તો દદૃશુર્વીરા વનં સુગ્રીવરક્ષિતમ્ ।
મધુસંજ્ઞં તદા પ્રાહુરઙ્ગદં વાનરર્ષભાઃ ॥ ૧૮॥

ક્ષુધિતાઃ સ્મો વયં વીર દેહ્યનુજ્ઞાં મહામતે ।
ભક્ષયામઃ ફલાન્યદ્ય પિબામોઽમૃતવન્મધુ ॥ ૧૯॥

સન્તુષ્ટા રાઘવં દ્રષ્ટું ગચ્છામોઽદ્યૈવ સાનુજમ્ ॥ ૨૦॥

અઙ્ગદ ઉવાચ ।
હનૂમાન્ કૃતકાર્યોઽયં પિબતૈતત્પ્રસાદતઃ ।
જક્ષધ્વં ફલમૂલાનિ ત્વરિતં હરિસત્તમાઃ ॥ ૨૧॥

તતઃ પ્રવિશ્ય હરયઃ પાતુમારેભિરે મધુ ।
રક્ષિણસ્તાનનાદૃત્ય દધિવક્ત્રેણ નોદિતાન્ ॥ ૨૨॥

પિબતસ્તાડયામાસુર્વાનરાન્ વાનરર્ષભાઃ ।
તતસ્તાન્ મુષ્ટિભિઃ પાદૈશ્ચૂર્ણયિત્વા પપુર્મધુ ॥ ૨૩॥

તતો દધિમુખઃ ક્રુદ્ધઃ સુગ્રીવસ્ય સ માતુલઃ ।
જગામ રક્ષિભિઃ સાર્ધં યત્ર રાજા કપીશ્વરઃ ॥ ૨૪॥

ગત્વા તમબ્રવીદ્દેવ ચિરકાલાભિરક્ષિતમ્ ।
નષ્ટં મધુવનં તેઽદ્ય કુમારેણ હનૂમતા ॥ ૨૫॥

શ્રુત્વા દધિમુખેનોક્તં સુગ્રીવો હૃષ્ટમાનસઃ ।
દૃષ્ટ્વાગતો ન સન્દેહઃ સીતાં પવનનન્દનઃ ॥ ૨૬॥

નો ચેન્મધુવનં દ્રષ્ટું સમર્થઃ કો ભવેન્મમ ।
તત્રાપિ વાયુપુત્રેણ કૃતં કાર્યં ન સંશયઃ ॥ ૨૭॥

શ્રુત્વા સુગ્રીવવચનં હૃષ્ટો રામસ્તમબ્રવીત્ ।
કિમુચ્યતે ત્વયા રાજન્ વચઃ સીતાકથાન્વિતમ્ ॥ ૨૮॥

સુગ્રીવસ્ત્વબ્રવીદ્વાક્યં દેવ દૃષ્ટાવનીસુતા ।
હનુમત્પ્રમુખાઃ સર્વે પ્રવિષ્ટા મધુકાનનમ્ ॥ ૨૯॥

ભક્ષયન્તિ સ્મ સકલં તાડયન્તિ સ્મ રક્ષિણઃ ।
અકૃત્વા દેવકાર્યં તે દ્રષ્ટું મધુવનં મમ ॥ ૩૦॥

ન સમર્થાસ્તતો દેવી દૃષ્ટા સીતેતિ નિશ્ચિતમ્ ।
રક્ષિણો વો ભયં માસ્તુ ગત્વા બ્રૂત મમાજ્ઞયા ॥ ૩૧॥

વાનરાનઙ્ગદમુખાનાનયધ્વં મમાન્તિકમ્ ।
શ્રુત્વા સુગ્રીવવચનં ગત્વા તે વાયુવેગતઃ ॥ ૩૨॥

હનૂમત્પ્રમુખાનૂચુર્ગચ્છતેશ્વરશાસનાત્ ।
દ્રષ્ટુમિચ્છતિ સુગ્રીવઃ સરામો લક્ષ્મણાન્વિતઃ ॥ ૩૩॥

યુષ્માનતીવ હૃષ્ટાસ્તે ત્વરયન્તિ મહાબલાઃ ।
તથેત્યમ્બરમાસાદ્ય યયુસ્તે વાનરોત્તમાઃ ॥ ૩૪॥

હનૂમન્તં પુરસ્કૃત્ય યુવરાજં તથાઙ્ગદમ્ ।
રામસુગ્રીવયોરગ્રે નિપેતુર્ભુવિ સત્વરમ્ ॥ ૩૫॥

હનૂમાન્ રાઘવં પ્રાહ દૃષ્ટા સીતા નિરામયા ।
સાષ્ટાઙ્ગં પ્રણિપત્યાગ્રે રામં પશ્ચાદ્ધરીશ્વરમ્ ॥ ૩૬॥

કુશલં પ્રાહ રાજેન્દ્ર જાનકી ત્વાં શુચાન્વિતા ।
અશોકવનિકામધ્યે શિંશપામૂલમાશ્રિતા ॥ ૩૭॥

રાક્ષસીભિઃ પરિવૃતા નિરાહારા કૃશા પ્રભો ।
હા રામ રામ રામેતિ શોચન્તી મલિનામ્બરા ॥ ૩૮॥

એકવેણી મયા દૃષ્ટા શનૈરાશ્વાસિતા શુભા ।
વૃક્ષશાખાન્તરે સ્થિત્વા સૂક્ષ્મરૂપેણ તે કથામ્ ॥ ૩૯॥

જન્મારભ્ય તવાત્યર્થં દણ્ડકાગમનં તથા ।
દશાનનેન હરણં જાનક્યા રહિતે ત્વયિ ॥ ૪૦॥

સુગ્રીવેણ યથા મૈત્રી કૃત્વા વાલિનિબર્હણમ્ ।
માર્ગણાર્થં ચ વૈદેહ્યા સુગ્રીવેણ વિસર્જિતાઃ ॥ ૪૧॥

મહાબલા મહાસત્ત્વા હરયો જિતકાશિનઃ ।
ગતાઃ સર્વત્ર સર્વે વૈ તત્રૈકોઽહમિહાગતઃ ॥ ૪૨॥

અહં સુગ્રીવસચિવો દાસોઽહં રાઘવસ્ય હિ ।
દૃષ્ટા યજ્જાનકી ભાગ્યાત્પ્રયાસઃ ફલિતોઽદ્ય મે ॥ ૪૩॥

ઇત્યુદીરિતમાકર્ણ્ય સીતા વિસ્ફારિતેક્ષણા ।
કેન વા કર્ણપીયુષં શ્રાવિતં મે શુભાક્ષરમ્ ॥ ૪૪॥

યદિ સત્યં તદાયાતુ મદ્દર્શનપથં તુ સઃ ।
તતોઽહં વાનરાકારઃ સૂક્ષ્મરૂપેણ જાનકીમ્ ॥ ૪૫॥

પ્રણમ્ય પ્રાઞ્જલિર્ભૂત્વા દૂરાદેવ સ્થિતઃ પ્રભો ।
પૃષ્ટોઽહં સીતયા કસ્ત્વમિત્યાદિ બહુવિસ્તરમ્ ॥ ૪૬॥

મયા સર્વં ક્રમેણૈવ વિજ્ઞાપિતમરિન્દમ ।
પશ્ચાન્મયાર્પિતં દેવ્યૈ ભવદ્દત્તાઙ્ગુલીયકમ્ ॥ ૪૭॥

તેન મામતિવિશ્વસ્તા વચનં ચેદમબ્રવીત્ ।
યથા દૃષ્ટાસ્મિ હનુમન્ પીડ્યમાના દિવાનિશમ્ ॥ ૪૮॥

રાક્ષસીનાં તર્જનૈસ્તત્સર્વં કથય રાઘવે ।
મયોક્તં દેવિ રામોઽપિ ત્વચ્ચિન્તાપરિનિષ્ઠિતઃ ॥ ૪૯॥

પરિશોચત્યહોરાત્રં ત્વદ્વાર્તાં નાધિગમ્ય સઃ ।
ઇદાનીમેવ ગત્વાહં સ્થિતિં રામાય તે બ્રુવે ॥ ૫૦॥

રામઃ શ્રવણમાત્રેણ સુગ્રીવેણ સલક્ષ્મણઃ ।
વાનરાનીકપૈઃ સાર્ધમાગમિષ્યતિ તેઽન્તિકમ્ ॥ ૫૧॥

રાવણં સકુલં હત્વા નેષ્યતિ ત્વાં સ્વકં પુરમ્ ।
અભિજ્ઞાં દેહિ મે દેવિ યથા માં વિશ્વસેદ્વિભુઃ ॥ ૫૨॥

ઇત્યુક્તા સા શિરોરત્નં ચૂડાપાશે સ્થિતં પ્રિયમ્ ।

દત્ત્વા કાકેન યદ્વૃત્તં ચિત્રકૂટગિરૌ પુરા ॥ ૫૩॥

તદપ્યાહાશ્રુપૂર્ણાક્ષી કુશલં બ્રૂહિ રાઘવમ્ ।
લક્ષ્મણં બ્રૂહિ મે કિઞ્ચિદ્દુરુક્તં ભાષિતં પુરા ॥ ૫૪॥

તત્ક્ષમસ્વાજ્ઞભાવેન ભાષિતં કુલનન્દન ।
તારયેન્માં યથા રામસ્તથા કુરુ કૃપાન્વિતઃ ॥ ૫૫॥

ઇત્યુક્ત્વા રુદતી સીતા દુઃખેન મહતાવૃતા ।
મયાપ્યાશ્વાસિતા રામ વદતા સર્વમેવ તે ॥ ૫૬॥

તતઃ પ્રસ્થાપિતો રામ ત્વત્સમીપમિહાગતઃ ।
તદાગમનવેલાયામશોકવનિકાં પ્રિયામ્ ॥ ૫૭॥

ઉત્પાટ્ય રાક્ષસાંસ્તત્ર બહૂન્ હત્વા ક્ષણાદહમ્ ।
રાવણસ્ય સુતં હત્વા રાવણેનાભિભાષ્ય ચ ॥ ૫૮॥

લઙ્કામશેષતો દગ્ધ્વા પુનરપ્યાગમં ક્ષણાત્ ।
શ્રુત્વા હનૂમતો વાક્યં રામોઽત્યન્તપ્રહૃષ્ટધીઃ ॥ ૫૯॥

હનૂમંસ્તે કૃતં કાર્યં દેવૈરપિ સુદુષ્કરમ્ ।
ઉપકારં ન પશ્યામિ તવ પ્રત્યુપકારિણઃ ॥ ૬૦॥

ઇદાનીં તે પ્રયચ્છામિ સર્વસ્વં મમ મારુતે ।
ઇત્યાલિઙ્ગ્ય સમાકૃષ્ય ગાઢં વાનરપુઙ્ગવમ્ ॥ ૬૧॥

સાર્દ્રનેત્રો રઘુશ્રેષ્ઠઃ પરાં પ્રીતિમવાપ સઃ ।
હનૂમન્તમુવાચેદં રાઘવો ભક્તવત્સલઃ ॥ ૬૨॥

પરિરમ્ભો હિ મે લોકે દુર્લભઃ પરમાત્મનઃ ।
અતસ્ત્વં મમ ભક્તોઽસિ પ્રિયોઽસિ હરિપુઙ્ગવ ॥ ૬૩॥

યત્પાદપદ્મયુગલં તુલસીદલાદ્યૈઃ
        સમ્પૂજ્ય વિષ્ણુપદવીમતુલાં પ્રયાન્તિ ।
તેનૈવ કિં પુનરસૌ પરિરબ્ધમૂર્તી
        રામેણ વાયુતનયઃ કૃતપુણ્યપુઞ્જઃ ॥ ૬૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે સુન્દરકાણ્ડે
પઞ્ચમઃ સર્ગઃ ॥ ૫॥

॥ સમાપ્તમિદમ્ સુન્દરકાણ્ડમ્ ॥

Encoded and proofread by
Vishwas Bhide vishwas underscore bhide at yahoo.com
Revised by PSA Easwaran and
ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe sundarakANDam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*